## ८. अक्षरब्रह्मयोगः

अर्जुन उवाच

किं तद् ब्रह्म किम् अध्यात्मं  किं कर्म पुरुषोत्तम ।
अधिभूतं च किं प्रोक्तम्  अधिदैवं किम् उच्यते ।।८.१।।
अधियज्ञः कथं कोऽत्र  देहेऽस्मिन् मधुसूदन ।
प्रयाणकाले च कथं  ज्ञेयोऽसि नियतात्मभिः ।।८.२।।

श्रीभगवानुवाच

अक्षरं ब्रह्म परमं  स्वभावोऽध्यात्मम् उच्यते ।
भूतभावोद्भवकरो  विसर्गः कर्मसंज्ञितः ।।८.३।।
अधिभूतं क्षरो भावः  पुरुषश्चाधिदैवतम् ।
अधियज्ञोऽहम् एवात्र  देहे देहभृतां वर ।।८.४।।
अन्तकाले च माम् एव  स्मरन् मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं  याति नास्त्य् अत्र संशयः ।।८.५।।
यं यं वापि स्मरन् भावं  त्यजत्य् अन्ते कलेवरम् ।
तं तं एवैति कौन्तेय  सदा तद्भावभावितः ।।८.६।।
तस्मात् सर्वेषु कालेषु  माम् अनुस्मर युध्य च ।
मय्य् अर्पितमनोबुद्धिर्  माम् एवैष्यस्य् असंशयम् ।।८.७।।
अभ्यासयोगयुक्तेन  चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं  याति पार्थानुचिन्तयन् ।।८.८।।
कविं पुराणम् अनुशासितारम्
अणोर् अणीयांसम् अनुस्मरेद् यः ।
सर्वस्य धातारम् अचिन्त्यरूपम्
आदित्यवर्णं तमसः परस्तात् ।।८.९।।
प्रयाणकाले मनसाचलेन
भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर् मध्ये प्राणम् आवेश्य सम्यक्
स तं परं पुरुषम् उपैति दिव्यम् ।।८.१०।।
यद् अक्षरं वेदविदो वदन्ति
विशन्ति यद् यतयो वीतरागाः ।
यद् इच्छन्तो ब्रह्मचर्यं चरन्ति
तत् ते पदं संग्रहेण प्रवक्ष्ये ।।८.११।।
सर्वद्वाराणि संयम्य  मनो हृदि निरुध्य च ।
मूर्ध्न्य् आधायात्मनः प्राणम्  आस्थितो योगधारणाम् ।।८.१२।।
ओम् इत्य् एकाक्षरं ब्रह्म  व्याहरन् माम् अनुस्मरन् ।
यः प्रयाति त्यजन् देहं  स याति परमां गतिम् ।।८.१३।।
अनन्यचेताः सततं  यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ  नित्ययुक्तस्य योगिनः ।।८.१४।।
माम् उपेत्य पुनर्जन्म  दुःखालयम् अशाश्वतम् ।
नाप्नुवन्ति महात्मानः  संसिद्धिं परमां गताः ।।८.१५।।
आब्रह्मभुवनाल् लोकाः  पुनरावर्तिनोऽर्जुन ।
माम् उपेत्य तु कौन्तेय  पुनर्जन्म न विद्यते ।।८.१६।।
सहस्रयुगपर्यन्तम्  अहर् यद् ब्रह्मणो विदुः ।
रात्रिं युगसहस्रान्तां  तेऽहोरात्रविदो जनाः ।।८.१७।।
अव्यक्ताद् व्यक्तयः सर्वाः  प्रभवन्त्य् अहरागमे ।
रात्र्यागमे प्रलीयन्ते  तत्रैवाव्यक्तसंज्ञके ।।८.१८।।
भूतग्रामः स एवायं  भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ  प्रभवत्य् अहरागमे ।।८.१९।।
परस् तस्मात् तु भावोऽन्यो  ऽव्यक्तोऽव्यक्तात् सनातनः ।
यः स सर्वेषु भूतेषु  नश्यत्सु न विनश्यति ।।८.२०।।
अव्यक्तोऽक्षर इत्य् उक्तस्  तम् आहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते  तद् धाम परमं मम ।।८.२१।।
पुरुषः स परः पार्थ  भक्त्या लभ्यस् त्व् अनन्यया ।
यस्यान्तःस्थानि भूतानि  येन सर्वम् इदं ततम् ।।८.२२।।
यत्र काले त्व् अनावृत्तिम्  आवृत्तिं चैव योगिनः ।
प्रयाता यान्ति तं कालं  वक्ष्यामि भरतर्षभ ।।८.२३।।
अग्निर् ज्योतिर् अहः शुक्लः  षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति  ब्रह्म ब्रह्मविदो जनाः ।।८.२४।।
धूमो रात्रिस् तथा कृष्णः  षण्मासा दक्षिणायनम् ।
तत्र चान्द्रमसं ज्योतिर्  योगी प्राप्य निवर्तते ।।८.२५।।
शुक्लकृष्णे गती ह्येते  जगतः शाश्वते मते ।
एकया यात्य् अनावृत्तिम्  अन्ययावर्तते पुनः ।।८.२६।।
नैते सृती पार्थ जानन्  योगी मुह्यति कश्चन ।
तस्मात् सर्वेषु कालेषु  योगयुक्तो भवार्जुन ।।८.२७।।
वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत् पुण्यफलं प्रदिष्टम् ।
अत्येति तत् सर्वम् इदं विदित्वा
योगी परं स्थानम् उपैति चाद्यम् ।।८.२८।।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे अक्षरब्रह्मयोगो नाम अष्टमोऽध्यायः ।।